'एको गोत्रे' (४.१.९३/१०९३) इति वचनात् ? सत्यमेतत् । इह तु गोत्राधिकारेऽपि सामर्थ्याद् यूनि प्रत्ययो विज्ञायते । गोत्राधिकारस्तूत्तरार्थः ॥

## यञिञोश्च । (१०१/११०३)

यञन्तात् इञन्ताच्च प्रातिपदिकादपत्ये फक् प्रत्ययो भवति । गार्ग्यायणः । वात्स्यायनः । इञन्तात्[1]– दाक्षायणः । [2]प्लाक्षायणः । 'द्वीपादनुसमुद्रं यञ्' (४.३.१०/१३८०), 'सुतङ्गमादिभ्य इञ्' (४.२.८०/१२९२) [3]इत्यतो न भवति । गोत्रग्रहणेन यञिञौ विशेष्येते । तदन्तात्तु यून्येवायं प्रत्ययः, गोत्राद् यूनि प्रत्ययो भवति इति वचनात्[4] ॥

## शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु । (१०२/११०४)

गोत्रे इत्येव । शरद्वत् शुनक दर्भ इत्येतेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति यथासङ्ख्यं भृगुवत्साग्रायणेषु [5]अर्थेषु अपत्यविशेषेषु । शारद्वतायनो भवति भार्गवश्चेत् । शारद्वतोऽन्यः । शौनकायनो भवति वात्स्यश्चेत् । शौनकोऽन्यः । दार्भायणो भवति आग्रायणश्चेत् । दार्भिरन्यः । शरद्वच्छुनकशब्दौ बिदादी । ताभ्यामञोऽपवादः फक्[6] ॥

## द्रोणपर्वतजीवन्तादन्यतरस्याम् । (१०३/११०५)

गोत्रे इत्येव । द्रोणादिभ्यः [7]प्रातिपदिकेभ्यो गोत्रापत्येऽन्यतरस्यां फक् प्रत्ययो भवति । [8]इञोऽपवादः । [9]द्रौणायनः, द्रौणिः । [10]पार्वतायनः, पार्वतिः । जैवन्तायनः, जैवन्तिः । कथमनन्तरः अश्वत्थामा द्रौणायनः इत्युच्यते । नैवात्र महाभारतद्रोणो गृह्यते । किं तर्हि ? अनादिः । [11]तत इदं गोत्रे प्रत्ययविधानम् । [12]इदानींतनात्तु श्रुतिसामान्यादध्यारोपेण तथाभिधानं [13]भवति ॥

## अनृष्यानन्तर्ये बिदादिभ्योऽञ् । (१०४/११०६)

गोत्रे इत्येव । बिदादिभ्यो गोत्रापत्ये अञ् प्रत्ययो भवति । बैदः । [14]और्वः । ये पुनरत्रानृषिशब्दाः पुत्रादयस्तेभ्योऽनन्तरापत्ये एव [15]भवति । पौत्रः । दौहित्रः । अनृष्यानन्तर्यस्यायमर्थः, अनृषिभ्योऽनन्तरे भवति इति । यद्ययमर्थः, ऋष्यपत्ये नैरन्तर्यप्रतिषेधो न कृतः स्यात् ? तत्रेदं न सिध्यति, '[16]इन्द्रभूः सप्तमः काश्यपानाम्' (वं.ब्रा. २.२४) । अनन्तरापत्यरूपेणैव ऋष्यणाभिधानं भविष्यति । अवश्यं चैतदेवं विज्ञेयम् । ऋष्यपत्ये नैरन्तर्यविषये प्रतिषेधे विज्ञायमाने कौशिको विश्वामित्रः इति दुष्यति । गोत्रे इत्येव, बैदिः । ननु च ऋष्यणा भवितव्यम् ? बाह्वादिः आकृतिगणः, तेन इञेव भवति ।

बिद । उर्व । [17]कश्यप । कुशिक । भरद्वाज । उपमन्यु । [18]किलालप । किदर्भ । विश्वानर । ऋष्टिषेण । ऋतभाग । हर्यश्व । प्रियक । [19]आपस्तम्ब । कूचवार । शरद्वत् । शुनक । धेनु । गोपवन । शिग्रु । बिन्दु । [20]भाजन । [21]अश्वावतान । श्यामाक । श्यमाक । श्यापर्ण । हरित । [22]किन्दास । वह्यस्क । अर्कलूष । वध्योष । विष्णुवृद्ध । प्रतिबोध । रथन्तर । रथीतर । गविष्ठिर । निषाद । मठर । मृद । पुनर्भू । पुत्र । दुहितृ । ननान्दृ । 'परस्त्री परशुं च'[23] (ग. सू. ७१) ॥

---

1. खल्वपि इत्यधिकम् ब, इञन्ताः ह. 2. नास्ति फ. 3. इत्यतः प्रत्ययः फ, ञितः ह. 4. इति इत्यधिकम् ब. 5. अर्थेषु नास्ति फ. 6. भवति इत्यधिकम् फ. 7. प्रातिपदिकेभ्यः गोत्रापत्ये नास्ति फ. 8. इञोऽपवादः नास्ति फ. 9. द्रोणायनः क. ड. 10. पर्वतायनः फ, पार्वतिः नास्ति फ. 11. तदन्तात् ब. 12. इदानीं तु तेषु क. 13. भवति नास्ति ड. 14. नास्ति फ. 15. भवति नास्ति क. 16. मित्रभूः न्या. 17. नास्ति क. 18. किलाव क. 19. अपस्तम्ब क. 20. भोजक क. 21. अश्वावितान क. 22. कुन्दास ब. 23. किलाल किलात इत्यधिकम् ब.